# Shri Dhanvantarinavakam

# શ્રીધન્વન્તરીનવકમ્

## Document Information

Text title : dhanvantarInavakam

File name : dhanvantarInavakam.itx

Category : vishhnu, vAsudevanElayath, nava

Location : doc_vishhnu

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


December 25, 2022

*sanskritdocuments.org*

# શ્રીધન્વન્તરીનવકમ્

દૈવાસુરૈર્ભાવિગણૈરજસ્રં
    પ્રમથ્યમાને જનજીવિતાબ્ધૌ ।
સમુદ્ગતં નૂતનકાલકૂટં
    પ્રતારકં મોહનબાહ્યરૂપમ્ ॥ ૧॥

લોકસ્તદાસેવનનષ્ટબોધઃ
    પ્રપદ્યતે હન્ત મહાવિપત્તિમ્ ।
ત્રાતું ન ચેષ્ટે વત નીલકણ્ઠઃ
    સ્વયં કૃતાનર્થકદર્થિતં તમ્ ॥ ૨॥

ધન્વન્તરં શ્રીભગવન્ પ્રસન્ન-
    સ્વયં સન્નિધેહિ દ્રુતમાર્તબન્ધો ।
પશ્યાત્ર લોકાન્ વિષવેગતપ્તાન્
    નિતાન્તરુગ્ણાન્ કરણત્રયેઽપિ ॥ ૩॥

કેચિન્મહામોહવશં પ્રયાતાઃ
    સંશેરતે દેવ! પરેતકલ્પાઃ ।
ઉન્મત્તચિત્તાઃ પરિતો ભ્રમન્તિ
    જગદ્દ્રુહશ્ચાસુરશક્તયોઽન્યે ॥ ૪॥

મન્દસ્મિતે સુન્દરશાતકુમ્ભ-
    કુમ્ભે તથા લોલવિલોચનાન્તે ।
નવામૃતં, કિઞ્ચ કરે જાળૂકાં
    સમાદદાનો ભગવન્નુપેહિ ॥ ૫॥

વિભો સમાશ્વાસયતાવદુદ્ય-
    ન્મૃદુસ્મિતાર્દ્રૈર્મધુરાવલોકૈઃ ।
વિષોગ્રવેગોત્થરુજાસહસ્રૈ-
    ર્નિપીડિતં વિશ્વમિદં કૃપાત્મન્! ॥ ૬॥

કરસ્થયાદિવ્યજળૂકયાશુ
    લોકસ્ય દૂરીકુરુ દૃષ્ટરક્તમ્ ।
હરે, સિરાઃ પૂરય હેમકુમ્ભ-
    નિર્યત્સુધાત્વાદજશુદ્ધરક્તૈઃ ॥ ૭॥

ઉલ્લાઘતાલાભસુહૃષ્ટચિત્તો
    લોકઃ સમુત્તિષ્ઠતુ શુદ્ધસત્વઃ ।
દેવી ચ સમ્પદ્વિજયં પ્રયાતુ
    માનુષ્યકે ત્વત્કરુણાકટાક્ષૈઃ ॥ ૮॥

ભિષગ્વરૈર્નિત્યમુપાસ્યમાન-
    પાદાબ્જ, ધન્વન્તરિરૂપ, વિષ્ણો ।
નારાયણારોગ્યસુખપ્રદાયિ-
    ન્નપૂર્વવૈદ્યાય નમોઽસ્તુ તુભ્યમ્ ॥ ૯॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતં શ્રીધન્વન્તરીનવકં સમ્પૂર્ણમ્ ।

---

*Shri Dhanvantarinavakam*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*